रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

105

405 (IGC)

# 2023

# संस्कृतम्

समय : 3 घण्टे ]

[ पूर्णांक : 80

## खण्ड – 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)

तमिलनाडु प्रदेशे भारतस्य दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते कन्याकुमारी। अत्र पूर्वसमुद्रस्य, पश्चिमसमुद्रस्य, दक्षिणसमुद्रस्य च सङ्गमः भवति। एते त्रयः समुद्राः भारतवर्षस्य पदतलं निरन्तरं प्रक्षालयन्ति। प्रातः सायं च सर्वदा जनानां महान् सम्मर्दः भवति। प्रातः सूर्योदयस्य सायं सूर्यास्तस्य च दृश्ये सर्वेषां मनांसि हरतः। अत्र एकम् अन्यद् दर्शनीयं स्थानम् अस्ति विवेकानन्दस्मारकम् नाम। कन्याकुमारीतः यन्त्रचालितया नौकया विवेकानन्दस्मारकं प्रति गन्तुं शक्यते। समुद्रतीरात् प्रस्थिता नौका आदौ तिरुवल्लुवरप्रतिमायाः समीपं गच्छति।

तिरुवल्लुवरमहोदयेन 'तिरुक्कुरल्' इति नामकः तमिलवेदः रचितः। इतः पुनः प्रयाणं कृत्वा स्मारकं प्रति गम्यते। तत्र भूतले एकं विशिष्टं ध्यानमन्दिरम् अस्ति यत्र अन्धकारमये प्रकोष्ठे प्रकाशमानम् 'ॐ' इति चित्रं दृश्यते। तत्र सर्वे मौनव्रतमेव धारयन्ति। समुद्रस्य स्वर्णमयं जलं, स्मारकस्य दर्शनं प्रेरणादायकं स्फूर्तिदायकं च भवति।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×4=2

(i) कुत्र जनानां महान् सम्मर्दः भवति?

(ii) एकम् अन्यद् दर्शनीयं स्थानं किं नाम?

(iii) 'तिरुक्कुरल्' नामकः तमिलवेदः केन रचितः?

(iv) अन्धकारमये प्रकोष्ठे किं दृश्यते?

(ख) संस्कृतस्य पूर्ण वाक्येन उत्तरत (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए) – 1×2=2

(i) किं प्रेरणादायकं स्फूर्तिदायकं च भवति?

(ii) अत्र कति समुद्राणां सङ्गमः भवति?



Downloaded from cclchapter.com

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3=3

(i) 'प्रक्षालयन्ति' अस्याः क्रियायाः कर्तृपदं किम्?

(ii) 'आदौ' इतिपदस्य पर्यायपदं लिखत?

(iii) 'तत्र भूतले एकं विशिष्टं ध्यानमन्दिरम् अस्ति' अस्मिन् वाक्ये 'तत्र' पदं कस्य सन्दर्भे प्रयुक्तः?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश का समुचित शीर्षक लिखिये) 1

**खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)**

2. प्रद्युम्नः छात्रावासे वसति। शारदीये अवकाशे तस्य महाविद्यालये संस्कृत-सम्भाषणशिविरं प्रचलिष्यति। अतः सः स्वगृहम् आगन्तुम् असमर्थः अस्ति इति सूचयन्तं पितरं प्रति लिखितं पत्रं मञ्जूषा पद सहायतया पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। ½×8=4

(प्रद्युम्न छात्रावास में रहता है। शारदीय अवकाश में उसके महाविद्यालय में संस्कृत सम्भाषण शिविर चलेगा। अतः वह अपने घर आने में असमर्थ है। यह सूचित करते हुये पिता को लिखे पत्र को मञ्जूषा में दिये गये पदों से पूर्ण कर पुनः अपनी उत्तरपुस्तिका में लिखिये)-

| **मञ्जूषा** - भविष्यति, वाराणसीतः, प्रद्युम्नः, वञ्चितः, कुशली, शारदीय अवकाशे, सुचारुरूपेण, आगमने |
|---|

(i) --------------------

दि0 - 20-03-2022

पूज्य पितृमहाभागाः,

सादरं प्रणमामि।

अहम् अत्र (ii)………। तत्रापि भवन्तः सर्वेऽपि कुशलिनः इति मन्ये। अत्र मम पठन-पाठनं (iii) …… प्रचलति। मम अर्धवार्षिकी परीक्षा समाप्ता जाता। विद्यालये (iv)….संस्कृत सम्भाषणशिविरं प्रचलिष्यति। अतः अहं गृहम् (v)…..असमर्थः अस्मि। यद्यपि भवतां दर्शनेन (vi) ….भवामि तथापि शिविरेण मम ज्ञानवर्धनं (vii) ……….।

मातृचरणयोः मम वन्दनानि। अन्यत् भवताम् आशिषम्।

भवदीयः पुत्रः

(viii) ……….

3. मञ्जूषायां प्रदत्त शब्दसूची सहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत-
(मञ्जूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को पूर्णकर उत्तरपुस्तिका में पुनः लिखिये) ½×8=4

कश्मिंश्चित् अधिष्ठाने शुद्धपटो नाम रजकः (i)………. स्म। तस्य एकः गर्दभः आसीत्। सोऽपि



Downloaded from cclchapter.com

तृणाभावात् अतिदुर्बलतां गतः। अथ तेन रजकेन अटव्यां परिभ्रमता मृतव्याघ्रो दृष्टः। चिन्तितश्च-अहो! शोभनम् आपतितम्। अनेन व्याघ्रचर्मणा प्रतिच्छाद्य रासभं रात्रौ (ii).....उत्स्रक्ष्यामि, येन व्याघ्रं (iii)..........समीपवर्तिनः क्षेत्रपालाः एनं न निष्कासयिष्यन्ति। तथा अनुष्ठिते रासभः (iv)..... यवभक्षणं करोति। एवं सः रासभः पुष्टतनुर्जातः। अथ अन्यस्मिन् अहनि सः दूरात् रासभीशब्दम् (v).....। श्रवणमात्रेणैव स्वयं शब्दयितुम् (vi).......। ते क्षेत्रपालाः तं रासभं (vii).......लगुडपाषाणप्रहारैः (viii)......।

| |
|---|
| **मञ्जूषा** – आरब्धः, प्रतिवसति, व्यापादितवन्तः , मत्वा, यथेच्छया, अशृणोत्, ज्ञात्वा, यवक्षेत्रम् |

4. अधोलिखितेषु **एकं** विषयम् अधिकृत्य चत्वारि वाक्यमितम् एकम् अनुच्छेदं संस्कृतेन लिखत- 1×4=4
(नीचे लिखे किसी **एक** विषय पर चार वाक्यों का संस्कृत में एक अनुच्छेद लिखिये)–
(i) संस्कृतदिवसः (ii) स्वच्छता-अभियानम् (iii) भ्रष्टाचार-निवारणम्

## खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि-विच्छेदं कुरुत – 1×5=5
(निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि-विच्छेद कीजिए)
(i) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम् ।
(ii) दौवारिक! मया दृढं परीक्षितोऽसि।
(iii) वारि भोजनान्ते विषापहम् ।
(iv) अल्पज्ञ एव पुरुषः प्रलपत्यजस्रम् ।
(v) जगच्चक्षुषि भास्करे।

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां विग्रहाः लेखनीयाः – 1×5=5
(निम्नलिखित वाक्यों में रेखांकित पदों का विग्रह कीजिये)
(i) एवमादि त्वया सौम्य विज्ञाप्यो वसुधाधिपः।
(ii) अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयः।
(iii) अहं त्वां कस्यापि देशद्रोहिणो गूढचरं मन्ये।
(iv) वीराग्रणी अभय-युद्धकलाकलापः।
(v) राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता।

7. निम्नलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति-प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत - 1×6=6
(निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिये)
(i) न शक्नोमि रोषं ---------- । (धृ+तुमुन्)
(ii) ---------च पस्पर्शनिस्तीर्णमिति वाजिनम्। (अव+तॄ+ल्यप्)
(iii) ततः स्थिरीभूय पुरतः --------- सत्यपि दीपप्रकाशे। (दृश्+शतृ)
(iv) भोजराजेन --------- सगौडो दक्षिणापथः। (भुज्+तव्यत्)



Downloaded from cclchapter.com

(v) राणाप्रताप बलवीर्य ------------। (वि+भास्+शानच्)

(vi) अपेक्षया ------------- हि विद्या। (रूप+मतुप्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1×4=4

(निम्नलिखित वाक्यों में कर्ता और क्रिया पदों की अन्विति कीजिये)

(i) अस्मद् राज्यभ्रंशो भवतः उद्योगं-------। (जनयसि / जनयति)

(ii) केवलं महाराज शिववीरस्याज्ञां----- शिरसा वहामः। (वयं / अहम्)

(iii) लक्ष्मीः स्वयं------- निवासहेतोः । (यान्ति / याति)

(iv) ततो राजा भोजवधं ज्ञात्वा तं -----------।(पृष्टवान् /पृष्टवती)

**अथवा**

अधोलिखितेषु वाक्येषु विशेषणविशेष्ययोः अन्वितिः क्रियताम् –

(निम्नलिखित वाक्यों में विशेषण विशेष्य की अन्विति कीजिये)

(i) स्वप्रकृत्यनुकूलः -------अपि प्राप्यते। (वरः/वराः)

(ii) पुष्पं फलं तदनु------समीरः। (गन्धवहः/गन्धवहं)

(iii) शोकसंतप्तो-------प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। (मुञ्जः/मुञ्जम्)

(iv) नोत्सहे -----------काले वारयितुमत्रभवतीम्। (श्लाघनीयं/श्लाघनीये)

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्- 1×4=4

(निम्नलिखित वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थानों की पूर्ति कीजिए)

(i) -------- एकाकिना किल गन्तव्यम्। (अस्मत्)

(ii) --------अन्वयं वक्ष्ये तनुवाग्विभवोऽपिसन्। (रघु)

(iii) वयं दौवारिकाः ------- अपि आज्ञा न प्रतीक्षामहे। (ब्रह्मन्)

(iv) आह्लादितं कुलं सर्वं यथा-------शर्वरी। (चन्द्र)

## खण्ड - 'घ' (पठितांश अवबोधनम् भाग-I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत –

(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

श्लोकमिमम् अधीत्य शोक सन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुं आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञः वह्निप्रवेशकार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः-शनैः प्राह-तात! मया भोजराजो रक्षित एवास्ति। पुनः बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः। सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः प्रावोचद् - हे योगीन्द्र! महापापिनो मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति। अथ कापालिकस्तं प्रावोचद् - राजन् ! मा भैषीः। शिवप्रसादेन स जीवितो भविष्यति। तदा श्मशानभूमौ कापालिकस्य योजनानुसारं भोजः तत्र समानीतः।



Downloaded from cclchapter.com

'योगिना भोजो जीवितः' इति कथा लोकेषु प्रसृता।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2=1

(i) किम् अधीत्य मुञ्जः आत्मनो वह्नौ प्रवेशनं निश्चितवान्?

(ii) राज्ञो वह्निप्रवेशकाले कः सभां समागतः?

(ख) पूर्ण वाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) - 1

(i) सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्जः किम् प्रावोचत्?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) 1×3=3

(i) 'समागतः' अस्य पदस्य विलोमपदं गद्यांशात् चित्वा लिखत?

(ii) 'प्राह' अस्याः क्रियायाः कर्तृपदं किम् ?

(iii) 'हतस्य पुत्रस्य प्राणदानेन मां रक्षेति' अस्मिन् वाक्ये 'मां' इति सर्वनामपदं कस्मै प्रयुक्तम्?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –
(निम्नलिखित नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए)-

ऋतध्वजः– माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा। नारी एव समस्तसृष्टेः निर्मात्री। परं कथनेन किम्? परीक्ष्य एव ज्ञास्यति अत्र भवती। परीक्षार्थमुद्यतोऽस्मि गृहस्थाश्रमप्रयोगशालायाम्।

मदालसा – स्वीकृतः प्रस्तावः।

कुण्डला – दिष्ट्या वर्धेथां युवाम्। मित्रवर, गन्धर्वकन्या मदालसा गान्धर्वविवाह-विधिना वृणोति अत्र भवन्तम्। आकारये अहं कुलगुरुं तुम्बुरुम्। असौ अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति।

ऋतध्वजः– प्रथमं तु सखीवचनं श्रोष्यावः। तदनु स्वयमेव कुलगुरुं, पितरौ च सभाजयितुं गमिष्यावः।

कुण्डला – परस्परप्रीतिमतोः भवतोः उपदेशस्य नास्ति कोऽपि अवकाशः तदपि सखीस्नेहः मां भाषयति- भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च। यतो हि धर्मार्थकामसंसिद्धये यथा भार्या भर्तुः सहायिनी भवति तथा न कोऽपि अन्यः।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×2=1

(i) का समस्तसृष्टेः निर्मात्री?

(ii) कः अग्निं साक्षीकृत्य आशीर्वचांसि वक्ष्यति?

(ख) पूर्ण वाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(i) गृहस्थाश्रमप्रयोगशालायां परीक्षार्थं कः उद्यतः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) – 1×3=3

(i) 'आकारये अहं कुलगुरूं तुम्बुरूम्' अत्र 'अहं' पदं कस्मै प्रयुक्तम्?

(ii) 'वृणोति' अनुच्छेदे अस्याः क्रियायाः कर्तृपदं लिखत?

(iii) 'वक्ष्यति' इति पदे कः लकारः?



Downloaded from cclchapter.com

12. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत –

(निम्नलिखित श्लोक को पढ़कर प्रश्नों के उत्तर दीजिये)-

वीराग्रणीरभय-युद्धकलाकलापः
क्वास्तेऽद्य हा! स तनयः सनयः प्रतापी।
अत्रत्य-निर्जनवनेऽथ यदा कदाचिद्
मातेव रोदिति सखे! कुररी नु काचित्।।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×2=1

(i) निर्जनवने मातेव का रोदिति?

(ii) अत्र प्रतापी तनयः कः अस्ति?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिये) – 1

(i) महाराणाप्रतापः कीदृशः तनयः अस्ति?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) – 1×3=3

(i) 'तनयः' अस्य पदस्य पर्याय पदं लिखत?

(ii) 'मातेव' अस्मिन् पदे सन्धि विच्छेदं कुरुत?

(iii) 'रोदिति' अस्य कर्तृपदं लिखत?

13. निर्देशानुसारं प्रश्नान् उत्तरत –

(निर्देशानुसार प्रश्नों के उत्तर दीजिए)-

(क) "दौवारिक! मया दृढं परीक्षितोऽसि, यथायोग्य एव पदे नियुक्तोऽसि।" ½+½=1

(i) एषा पंक्तिः कः कम् प्रति कथयति?

(ख) "स पिता पितरस्तासां केवलं जन्महेतवः" ½+½=1

(i) एषा पंक्तिः कस्मात् ग्रन्थात् संकलिता?

(ii) अस्य ग्रन्थस्य रचनाकारः कः?

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत- 1+1=2

(नीचे दिये खण्डों में, तीन भावार्थों में से शुद्ध भावार्थ का चयन कर लिखिये)-

(क) "स्वजननिभृतः सर्वोप्यवं मृदुः परिभूयते।"

**भावार्थ -**

(i) स्वजनान् प्रति विनयशीलः जनः एवम् एव तिरस्क्रियते।

(ii) स्वजनैः तिरस्कृतः जनः एवं सम्मानितो भवति।

(iii) स्वजनैः सम्मानितः जनः एवं एव समादृयते।

(ख) "रघूणामन्वयं वक्ष्ये तनु वाग्विभवोऽपि सन्"

**भावार्थ -**

(i) वाणीवैभवम् अधिकेसति रघुवंशिनां वर्णनं करिष्यामि।

(ii) वाणीवैभवं स्वल्पे सति रघुवंशिनां वर्णनं न करिष्यामि।

(iii) वाणीवैभवं स्वल्पेसति रघुवंशिनां वर्णनं करिष्यामि।

**अथवा**



Downloaded from cclchapter.com

अधोदत्त श्लोकस्य प्रदत्त भावार्थं मञ्जूषा प्रदत्तपदैः पूरयित्वा लिखत – ½×4=2

(नीचे दिये गये श्लोक के भावार्थ को मञ्जूषा में दिये गये पदों से पूर्ण करके लिखिये)

न दुर्जनः सज्जनतामुपैति
शठः सहस्रैरपि शिक्ष्यमाणः।
चिरं निमग्नोऽपि सुधासमुद्रे
न मन्दरो मार्दवमभ्युपैति।।

**भावार्थः** – कविः कथयति यत् (i) ........जनैः अपि शिक्षितः दुर्जन पुरुषः सज्जनतां न प्राप्नोति। यथा (ii) .........चिरकालपर्यन्तं मज्जितः मन्दराचलः कोमलतां (iii) .........तात्पर्यमस्ति (iv) ......... स्वभावः अपरिवर्तनशीलः भवति।

| **मञ्जूषा** - सहस्रैः, न प्राप्नोति, अमृतसागरे, दुर्जनस्य। |
|---|

15. अधोलिखित श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –

(नीचे दो श्लोकों का अन्वय दिया गया है, उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिये)

(क) द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोप्यासीदङ्गुलीवोरगक्षता।। ½×4=2

**अन्वयः** - शिष्टः (i) ........... अपि तस्य सम्मतः (आसीत्) यथा (ii) ............औषधम्। दुष्टः प्रियः अपि (iii)...........अङ्गुलि इव (iv) .................आसीत्।

(ख) गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः ।। ½×4=2

**अन्वयः** - गुणी गुणं (i) ............निर्गुणः न वेत्ति, (ii) ............बलं वेत्ति, निर्बलः न वेत्ति। पिकः (iii)............गुणं (वेत्ति), वायसः न (वेत्ति), करी च (iv).............बलं (वेत्ति) मूषकः न (वेत्ति)।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत– ½×4=2

(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिए गये वाक्यांशों के साथ उचित मिलान कीजिये)

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) सेतुर्येन महोदधौ विरचितः | (i) चपलेति चित्रम्। |
| (ख) ज्योत्स्ना तमः सहचरी | (ii) यथा चन्द्रेण शर्वरी। |
| (ग) आह्लादितं कुलं सर्वं | (iii) शशासैकपुरीमिव। |
| (घ) अनन्यशासनामुर्वीं | (iv) क्वासौ दशास्यान्तकः |



Downloaded from cclchapter.com

17. अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत- 1×3=3

(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार उचित अर्थ कोष्ठक से चुनकर लिखिये।)

(क) इमं ताक्ष्योंपमजवं तुरङ्गम् अनुगच्छता (गजम्, अश्वम्, हरिणम्)

(ख) आचार्यो अन्तेवासिनम् अनुशास्ति। (मनुष्यम्, गुरुम्, शिष्यम्)

(ग) यस्याः शक्रसमो भर्ता मया पुत्रवती च या। (इन्द्रः, नृपः, ब्रह्मा)

**खण्ड - 'घ' (संस्कृत साहित्य-परिचयः भाग-II)**

18. अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत –

(निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिये) –

(क) कवयः 1×2=2

(i) बाणभट्टः

(ii) कालिदासः } देशः

(ख) कवयः 1×2=2

(i) अम्बिकादत्त व्यासः

(ii) अश्वघोषः } कालः

(ग) कवयः 1×4=4

(i) वेदकुमारी घई

(ii) रमाकान्त रथः

(iii) नारायण पण्डितः

(iv) भासः } काऽपि एका रचना

अथवा

(क) निम्नांकित वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम् - 1×4=4

(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान की पूर्ति कीजिये)

(i) उत्तर रामचरिते-------विशिष्यते। (भवभूतिः/भासः/शूद्रक)

(ii) प्रतिमानाटकस्य रचनाकारः--------अस्ति। (भासः/कालिदासः/भट्ट नारायणः)

(iii) चम्पूकाव्यम् अस्ति-----। (गद्यमयं/काव्यमयं/गद्यपद्यमयं)

(iv) काव्येषु नाटकं रम्यं तत्र रम्या------। (मदालसा/शकुन्तला/कुण्डला)

(ख) महाकाव्यस्य चत्वारः विशेषताः लिखत। 4

(महाकाव्य की चार विशेषतायें लिखिये)

*****



Downloaded from cclchapter.com